K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

## ।।श्री चण्डी नवाक्षरी मन्त्रः।।

ब्रह्म विष्णु रुद्र ऋषयः गायत्र्युष्णिगनुष्टुभश्छंदांसि
श्री महाकाळी महा लक्ष्मी महा सरस्वत्यो देवताः ।
नन्दाशाकम्भरीभीमाः शक्तयः । रक्तदन्तिकादुर्गा भ्रामर्यो बीजानि ।
अग्नि वयु सूर्यास्तत्वानि । ऐं हृदयाय नमः । ह्रीं शिरसे स्वाहा ।
क्लीं शिखायै वषट् ।चामुण्डायै कवचाय हुम् ।विच्चे नेत्रत्रयाय वौषट् ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् । ॐ भूर्भुवःस्वरों इति दिग्बन्धः।।

### ध्यानं

खड्गं चक्रगदेषु चापरिघाञ्छूलं भुशुंडीं शिरः
शंखंसंदधतीं करैस्त्रिनयनां सर्वांग भूषावृतां।
नीलाश्मद्युति मास्य पाद दशकां सेवे महाकालिकाम्
यामस्तौ त्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ।।१ ।।
अक्षस्रक्परशू गदेषु कुलिशं पद्मं धनुःकुण्डिकाम्
दण्डं शक्ति मसिंश्च चर्म जलजं घण्टां सुराभाजनम्।
शूलं पश सुदर्शने च दधतीं हस्तैः प्रवालप्रभाम्
सेवे सैरिभ मर्दिनीमिहमहा लक्ष्मीं सरोजस्थिताम्।।२।।
घण्टा शूल हलानि शंखमुसले चक्रं धनुः सायकंम्
हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगता माधार भूतां महा
पूर्वामित्रसरस्वतीमनुभजे शुम्भादि दैत्यार्दिनीम्।।३ ।।
मन्त्रः ॐ ऐं ह्रीं क्लीं चमुण्डायै विच्चे।।